# INDIAN SCHOOL AL WADI AL KABIR

| Class: IX | Department: Sanskrit | Date of submission: NA |
|---|---|---|
| प्रश्नबैंक | Topic: सुखस्य मूलं धर्मः, धर्मस्य मूलम् अर्थः | Note: Pl. file in portfolio |

**१. एकपदेन उत्तरं लिखत -**

(क) वास्तविकसुखस्य आधारः कः ? — धर्म:

(ख) कस्य अभावात् स्वकर्तव्यपालनं कठिनं भवति? — अर्थस्य/ धनस्य

(ग) स्वस्थः आर्थिकव्यवहारः कतिविधः भवति? — त्रिविध:

(घ) कीदृशः आर्थिकव्यवहारः कदापि न करणीयः? — **अनैतिक**/अस्वस्थ/ऋणग्रस्त

(ङ) स्वावलम्बनं कस्य मूलं वर्तते? — स्वाभिमानस्य

(च) जलबिन्दुनिपातेन क्रमशः किं पूर्यते? — घट:

**२. पूर्णवाक्येन उत्तरं लिखत**

(क) "सुखस्य मूलं धर्मः, धर्मस्य मूलम् अर्थः" इतीदं प्रसिद्धं वाक्यं कस्मिन् ग्रन्थे प्राप्यते?

**उत्तर -** सुखस्य मूलं धर्मः, धर्मस्य मूलम् अर्थः इति प्रसिद्धं वाक्यं कौटिलस्य अर्थशास्त्रे प्राप्यते ।

(ख) सामान्यजीवने कासाम् आवश्यकतानां पूर्त्यर्थं धनम् आवश्यकम्?

**उत्तर -** सामान्यजीवने भोजनं, वस्त्रं, आवासः, शिक्षा, स्वास्थ्य सेवा आवश्यकतानां पूर्त्यर्थं धनम् आवश्यकम् ।

(ग) ब्राह्मे मुहूर्ते कयोः चिन्तनम् आवश्यकम्?

**उत्तर -** ब्राह्मे मुहूर्ते धर्मस्य अर्थस्य च चिन्तनम् आवश्यकम् ।

(घ) जनः केन स्वावलम्बी भवति ?

**उत्तर -** सञ्चयस्य अभ्यासेन जनः स्वावलम्बी भवति ।

(ङ) लघुलघुसञ्चयः अपि कालान्तरे केन रूपेण वर्धते?

**उत्तर -** लघुलघुसञ्चयोऽपि कालान्तरे महत्सम्पत्ति रूपेण वर्धते ।

**३. वाक्येन सह ग्रन्थस्य सम्मेलनं कुरुत -**

| | |
|---|---|
| (क) जलबिन्दुनिपातेन क्रमशः पूर्यते घटः । | ४. चाणक्यनीति |
| (ख) ब्राह्मे मुहूर्ते चोत्थाय धर्ममर्थं च चिन्तयेत्। | १. गरुडपुराणम् |
| (ग) सर्वेषामेव शौचानामर्थशौचं परं स्मृतम् । | २. मनुस्मृतिः |
| (घ) सुखस्य मूलं धर्मः, धर्मस्य मूलम् अर्थः । | ३. अर्थशास्त्रम् |

**४. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत -**

(क) **<u>सुखस्य</u>** मूलं धर्मः । कस्य

(ख) दिनस्य आरम्भे <u>धर्मार्थयोः</u> चिन्तनम् आवश्यकम् । कयोः

(ग) सन्मार्गेण एव **<u>धनार्जनं</u>** करणीयम् । कम्

(घ) **<u>अनैतिकः</u>** आर्थिकव्यवहारः कदापि न करणीयः । कीदृशः

(ङ) संकटकाले **<u>स्वाभिमानिजनः</u>** अन्यजनस्य आर्थिकसहायतां नापेक्षते। कः

**५. उचितैः पदैः रिक्तस्थानानि पूरयत -**

| विद् | विद्यते | विद्येते | विद्यन्ते |
|---|---|---|---|
| लभ् | लभते | लभेते | लभन्ते |
| अपेक्ष | अपेक्षते | अपेक्षेते | अपेक्षन्ते |
| वर्ध् | वर्धते | वर्धेते | वर्धन्ते |
| सेव् | सेवते | सेवेते | सेवन्ते |
| मोद् | मोदते | मोदेते | मोदन्ते |

**६. अधोलिखितानां प्रश्नानां शुद्धं विकल्पं चिनुत -**

(क) "सुखस्य मूलं धर्मः, धर्मस्य मूलम् अर्थः" इत्यस्य मुख्य आशयः कः अस्ति?

(१) सुखस्य आधारः केवलम् अर्थः एव। (२) धर्मस्य आधारः केवलं सुखम् एव ।

**(३) धर्मस्य आधारः अर्थः, सुखस्य आधारः धर्मः ।**

(४) सुखं, धर्मः, अर्थः एतेषां मध्ये सम्बन्धः नास्ति ।

**(ख) गरुडपुराणे किम् उपदिष्टम् अस्ति ?**

(१) रात्रौ धनस्य चिन्तनं करणीयम् ।

**(२) प्रभाते धर्मार्थयोः चिन्तनं करणीयम् ।**

(३) केवलं धर्मचिन्तनं करणीयम् ।

(४) केवलम् अर्थचिन्तनं करणीयम्।

**(ग) "सर्वेषामेव शौचानामर्थशौचं परं स्मृतम्" इत्यस्य तात्पर्य किम् ?**

(१) जलशौचमेव श्रेष्ठम् । (२) मृद्वारिशौचमेव श्रेष्ठम् ।

**(३) अर्थशौचं सर्वोपरि, अन्यविधशौचेभ्यः श्रेयः ।** (४) शौचस्य आवश्यकता नास्ति ।

**(घ) छात्रैः क्रियमाणः अपव्ययः कः ?**

(१) स्वास्थ्यलाभाय व्ययः । (२) विद्यार्जनाय व्ययः ।

**(३) आडम्बरयुक्तः प्रदर्शनात्मकः व्ययः।** (४) आत्मसुरक्षायै व्ययः ।

**(ङ) "जलबिन्दुनिपातेन क्रमशः पूर्यते घटः" इति वाक्यं कः अवदत् ?**

(१) बृहस्पतिः **(२) चाणक्यः**

(३) मनुः (४) याज्ञवल्क्यः

--------------------------------------------------- 000 -------------------------------------